श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ शृङ्गारपद्धतिः दशमी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ शृङ्गारपद्धतिः दशमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

शौरेः शृङ्गारचेष्टानां प्रसूतिं पादुकां भजे।
यामेष भुङ्क्ते शुद्धान्तात् पूर्वं पश्चादपि प्रभुः ॥ 10.1 ॥

प्रणतत्रिदशेन्द्रमौळिमाला मकरन्दार्द्रपरागपङ्किलेन।
अनुलिम्पति पादुके ! स्वयं त्वाम् अनुरूपेण पदेन रङ्गनाथः ॥ 10.2 ॥

अवदातहिमांशुकानुषक्तं
पदरक्षे ! त्वयि रङ्गिणः कदाचित्।
किमपि स्थितमद्वितीयमाल्यं
विरलावस्थितमौक्तिकं स्मरामि ॥ 10.3 ॥

असहायगृहीतरङ्गनाथाम्
अवरोधाङ्गणसीम्नि पादुके ! त्वाम्।
सुदृशः स्वयमर्चयन्ति दूरात्
अवतंसोत्पलवासितैरपाङ्गैः ॥ 10.4 ॥

निर्विश्यमानमपि नूतनसन्निवेशं
कैवल्यकल्पितविभूषणकायकान्तिम्।
कालेषु निर्विशसि रङ्गयुवानमेका
शृङ्गारनित्यरसिकं मणिपादरक्षे ! ॥ 10.5 ॥

निद्रायितस्य कमितुर्मणिपादुके ! त्वं
पर्यङ्क्किकापरिसरं प्रतिपद्यमाना।
श्वासानिलप्रचलितेन भजस्यभीक्ष्णं
नाभीसरोजरजसा नवमङ्गरागम्॥ **10.6** ॥

शयितवति रजन्यां पादुके ! रङ्गबन्धौ
चरणकमलपार्श्वे सादरं वर्तसे त्वम्।
फणिपतिशयनीयादुत्थितस्य प्रभाते
प्रथमनयनपातं पावनं प्राप्तुकामा॥ **10.7** ॥

चरणकमलसङ्गाद्रङ्गनाथस्य नित्यं
निगमपरिमळं त्वं पादुके ! निर्वमन्ती।
नियतमतिशयाना वर्तसे सावरोधं
हृदयमधिवसन्तीं मालिकां वैजयन्तीम्॥ **10.8** ॥

उपनिषदबलाभिर्नित्यमुत्तंसनीयं
किमपि जलधिकन्याहस्तसंवाहनार्हम्।
तव तु चरणरक्षे ! देवि लीलारविन्दं
चरणसरसिजं तच्चारु चाणूरहन्तुः॥ **10.9** ॥

अखिलान्तःपुरवारेष्वनेकवारं पदावनि ! स्वैरम्।
अनुभवति रङ्गनाथो विहारविक्रान्तिसहचरीं भवतीम्॥ **10.10** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे शृङ्गारपद्धतिः दशमी॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥